**Sri Sathya Sai Books and Publications Trust,**
**Prasanthi Nilayam.**

# श्री रुद्रम्

## 9th Anuvaka

नम इरिण्याय च प्रपथ्याय च नमः किगुंशिलाय च क्षयणाय च
nama iriṇyāya ca prapathyāya ca namaḥ kigṁśilāya  ca kṣayaṇāya ca

नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च
namaḥ kapardine ca pulastaye ca namo goṣṭhayāya ca gṛhyāya ca

नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च
namastalpyāya ca gehyāya ca namaḥ kāṭyāya ca gahvareṣṭhāya ca

नमो ह्रदय्याय च निवेष्प्याय च नमः पागुं सव्याय च रजस्याय च
namo hradayyāya ca niveṣpyāya ca namaḥ pāgṁ savyāya ca rajasyāya  ca

नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च
namaḥ śuṣkyāya ca harityāya ca namo lopyāya colapyāya ca

नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च
nama ūrvyāya ca sūrmyāya ca namaḥ parṇyāya ca parṇaśadyāya ca

नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च प्रख्खिदते च
namo'paguramāṇāya cābhighnate ca nama ākhkhidate ca prakhkhidate ca

नमो वः किरिकेभ्यो देवानागुं हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो
namo vaḥ kirikebhyo devānāgṁ hṛdayebhyo namo vikṣīṇakebhyo namo vicinvatkebhyo

नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥९॥
nama ānirhatebhyo nama āmīvatkebhyaḥ **||9||**